MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

A Critical Study of Female Characters Mentioned in Damodaragupta's Kuṭṭanīmatam

दामोदरगुप्तविरचिते कुट्टनीमते उल्लिखित-स्त्रिपात्राणां समीक्षात्मकमध्ययनम्

Raju Kar

Assistant Professor
Department of Sanskrit, Saheed Kshudiram College
Kamakhyaguri, Alipurduar, West Bengal, India.
Email: karraju.cob@gmail.com
Page No: 52-57

Abstract: *Damodaragupta's Kuṭṭanīmata holds a distinguished place in Sanskrit literature. This poetic work fascinatingly portrays the life stories of courtesans, their social conduct, romantic liaisons, artistic proficiency, and various cultural tendencies of contemporary society. Although the text encompasses a wide array of male and female characters, the present research critically examines only the nature, temperament, and character traits of the female figures. Through this analysis of female characters, it becomes evident that the poet has effectively reflected the worldview of the society of that period alongside the diverse dimensions of human nature.*

Keywords: *Characters (Male and Female), Characterization, Kuṭṭanīmata, Poetry, Literature, Beauty, Sweetness.*

भूमिका— विश्वेऽस्मिन् सम्प्रति बहूनां भाषाणां साहित्यम् अवलोक्यते, किन्तु संस्कृतभाषया विरचितस्य साहित्यस्य गरीमा अतुलनीया अनवद्या च। अस्मिन् साहित्ये सर्वेषां विषयाणाम् एकत्रे समावेशः प्राप्यते। वस्तुतः संस्कृतसाहित्यस्य गुरुत्वम् अपरिसीमम्। कविना विल्हणेन तस्य विक्रमाङ्कदेवचरिते काव्येन सह अमृतस्य तुलना क्रियते। यथा—

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्दाः।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति।।[1]

अस्माकं सुप्राचीनं संस्कृतसाहित्यभाण्डारम् अतिकायं सुविशालम्। संस्कृतसाहित्यस्य रत्नभाण्डारम् एतावत् सुविशालोऽस्ति यत् अद्यपर्यन्तं तस्य बहवः रत्नाः अनाविष्कृताः एव सन्ति। अत्र अस्माकम् आलोचनीयं काव्यं कुट्टनीमतमपि तत् सदृशमेकं रत्नम् अस्ति। अस्य कुट्टनीमतस्य रचनाकारोऽस्ति दामोदरगुप्तः। ग्रन्थस्य अयं रचनाकालः अस्ति ११४८ - ११४९ ईशवीयाब्दः। काव्ये मूलतः कथात्रयं वर्तन्ते। यथा— विकरालासंवादः, हारलताख्यानम्, मञ्जर्याख्यानञ्च।

काव्ये चरित्रचित्रणस्य प्रयोजनीयता — काव्यस्य कथावस्तुनः विस्तारः विशिष्टपात्राणां जीवनवृत्तैः घटनाविशेषैः वा सम्बद्धः भवति। कविः स्वविचाराणां, दर्शनानां, भावनानाञ्च प्रकटीकरणं एभिः पात्रैः करोति। वस्तुतः चरित्रचित्रणम् अतिवगुरुत्वपूर्णं वर्तते। गुरुत्वमनुसारेण विषयवस्तुनः अनन्तरं चरित्रचित्रणस्य स्थानं वर्तते इति एरिस्टटलवर्येण उक्तम्। केचन पुनः चरित्रचित्रणमेव मुख्यमिति उक्तवन्तः। प्रख्यातसमालोचकेन हेनरि-हाडसनवर्येण उक्तं यत्—

"In theatrical work story, incident and situation should be only another phase of the development of character…… characterisation is really fundamental and lasting element in the greatness of any dramatic work."[2]

रसात्मकं वाक्यं काव्यम् इति उच्यते। अस्य काव्यस्य रसास्वादनाय यथायथभावेन चरित्राणाम् उपस्थापनम् आवश्यकम्। काव्यस्य विषयवर्णने काव्यकारः चरित्राणामुपरि तथा तेषां कर्मप्रचेष्टायाः उपरि निर्भरं करोति। चरित्रेण हि काव्यस्य आरम्भः, विकासः तथा अन्तः भवति।

चरित्राणां श्रेणीविन्यासः — काव्यस्य अन्यतमं महत्त्वपूर्णम् अंशं भवति चरित्रचित्रणम्। इदं चरित्रं नानाविधं भवितुम् अर्हन्ति। गुरुत्वमनुसारेण साहित्यसमालोचकैः चरित्रं मुख्यं गौणञ्च भेदेन द्विधा विभक्तं कृतम्। पुनः लिङ्गानुसारेण चरित्रं

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

द्विविधं यथा- पुरुषचरित्रं स्त्रीचरित्रं च। नाट्यशास्त्रकारेण भरतमुनिना पात्राणां विभागत्रयं स्वीकृतम्। विषयेऽस्मिन् उक्तञ्च साहित्यदर्पणे आचार्यविश्वनाथेन—

अथ नायिका त्रिविधा, स्वाऽन्या साधारणी स्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता।।[3]

अर्थात् नायिका त्रिविधाः (क) स्वीया, (ख) अन्या, (ग) सामान्या चेति।

कुट्टनीमतमिति काव्यस्य स्त्रीपात्राणां चरित्र-चित्रणम्

दामोदरगुप्तविरचिते कुट्टनीमते बहूनां पात्र-पात्रीणां समावेशः परिलक्ष्यते। काव्यस्य फलप्राप्तये तेषां सर्वेषां अतुलनीया भूमिका वर्तते। काव्यस्य मूलकाहिनीवर्णनावसरे दामोदरगुप्तेन विविधानां पात्र-पात्रीणां चारित्रिकवर्णना प्रदीयते। चरित्रविश्लेषणे कुत्रापि कवेर्नैपुण्यतायाः अभावः न परिदृश्यते। अन्यसंस्कृतकाव्येन साकं कुट्टनीमतस्य मूलपार्थक्यम् एवमस्ति यत् अस्य काव्यस्य विविधानि चरित्राणि प्राणवन्तानि एव। अस्मिन् शोधपत्रे काव्यस्य सर्वेषां स्त्रिपात्राणां चरित्रचित्रणं क्रमशः प्रस्तूयते—

(1) **मालती** — कुट्टनीमते एकाधिक-नायिकानाम् उल्लेखः प्राप्यते। नायिकासु अन्यतमा अस्ति मालती। एषा मालती वाराणसीनगरस्य गणिकाकुलस्य भूषणस्वरूपा अस्ति। काव्येऽस्मिन् कविना दामोदरगुप्तेन मालत्याः चरित्रं सम्यग्तया चित्रितम्। तस्याः बहवः आयामाः अत्र प्रदर्शिताः। सा सामान्या नायिका अस्ति। या धैर्यवती, रतिकलानिपुणा, वेश्या इति नामधेया च भवेत् सा नायिका सामान्यानायिका इति कथ्यते । उक्तञ्च साहित्यदर्पणकारेण —

धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका।।[4]

मालती आसीत् अपूर्वसुन्दरी। काव्येऽस्मिन् दामोदरगुप्तेन विविधैः वाक्यैः मालत्याः सौन्दर्यं पाठकानां समक्षं प्रकाशितम्। काव्यस्य प्रारम्भे मालत्याः शरीरं चन्द्रविभूषितशरीरेण[5] सह तुलना कृता दामोदरगुप्तेन, यतो हि तस्याः शरीरं नानाविधेन स्वर्णालङ्कारेण सज्जितः आसीत्। मालत्याः शरीरमासीत् कामदेवतुल्यम् ईर्षणीयम्। मालतीचरित्रस्य अन्यतमं वैशिष्ट्यमस्ति तस्याः निरहंकारता। मालती शास्त्रज्ञाऽऽपि अस्ति। काव्यस्य घटनाविन्यासे वयं द्रष्टुं शक्यते यत् कामशास्त्रे तस्याः निपुणता आसीत्। न केवलं कामशास्त्रे अपि तु भरतप्रणीतस्य नाट्यशास्त्रे, विशाखिलस्य कलाशास्त्रे, दन्तिलस्य सङ्गीतशास्त्रे, वृक्षायुर्वेदे, चित्रकलायाम्, सूचीशिल्पे, पत्रछेद्यविधाने, इन्द्रजाले, पुत्तलिका-निर्मोणे, पाकशास्त्रे च तस्याः पाण्डित्यं परिलक्ष्यते।

(2) **विकराला** — विकराला इति कुट्टन्याः उपदेशात् काव्यस्य 'कुट्टनीमतम्' इति नामकरणम् अभवत्। विकरालाचरित्रस्य अन्यतमम् अलङ्कारम् अस्ति तस्याः मधुरवाक्यम्। उपदेष्टानां सर्वदा मधुरभाषी भवितव्यम् अस्ति। कामशास्त्रे अभिज्ञा विकरालाऽऽपि आसीत् मधुरभाषी।[6] अन्येन सह कथम् आचरणीयं वक्तव्यं च तस्मिन् विषये तस्याः अभिज्ञता आसीत्। अतः वयं द्रष्टुं शक्यते यत् काव्ये प्रार्थी-मालतीं विकराला मधुभाषया उपदेशं ददाति स्म। काव्ये उल्लिखितेन 'रुचिरवो विकराला'[7] इति वाक्यांशेन विकरालायाः मधुरभाषीति चारित्रिकवैशिष्ट्यस्य परिचयः प्राप्यते।

विकराला शास्त्रज्ञा अपि आसीत्। मालतीं प्रति विकरालाप्रदत्तेषु उपदेशेषु तस्याः कामशास्त्रविषयक-पाण्डित्यस्य परिचयः प्राप्यते। तया कृता "तव इदं दैहिकसौन्दर्यं हि यथेष्टमस्ति भगीगणस्य चित्तहरणाय"[8], "यदि अतुलधनसम्पदं निजहस्तगतं कर्तुम् इच्छति तर्हि भट्टपुत्रं चिन्तामणिं हस्तगतं कुरु" इत्यादिषु वाक्येषु तस्याः कामशास्त्रविषयक-निपुणता प्रकाश्यते।

(3) **हारलता** — दामोदरगुप्तविरचितस्य कुट्टनीमतस्य अन्यतमा नायिका अस्ति हारलता। एषा हारलता अपि एका गणिका अस्ति। हारलतायाः कान्तिरतीव रमणीया, तथासीत् सा अपरूपा सुन्दरी। दामोदरगुप्तस्य वर्णनया हारलतायाः असामान्य-दैहिकलावण्यस्य परिचयः प्राप्यते। काव्ये हारलतायाः सौन्दर्यं मेघच्युतविद्युतप्रभया सह, चन्द्रविहीनज्योत्स्नया सह, मदनरहितरत्या सह तथा भगवतः नारायणस्य वक्षच्युतलक्ष्मीदेव्या सह कविना तुलना कृता। ईश्वरस्य श्रेष्ठकीर्तिं सा हारलता आसीत् सकलजीवानां सारभूतसौन्दर्यानां दृष्टान्तस्वरूपः। एषा हारलता कामदेवस्य विजयास्त्रवत्, पुष्पसमृद्धवसन्तऋतुवत्, शृङ्गाररसेन सन्तरणरता कलहंसीवत्, नीलारूपपत्रेण आच्छादितलतावत्, तपस्वीनां समाधिवर्मभेदकवल्लीवत् च आसीत्। काव्ये हारलतायाः नयनयुगलेन सह मृगनयनस्य तुलना उपलभ्यते। अर्थात् कविना हारलतां मृगनयना इति सम्बोध्यते।[9] काव्ये

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

हारलतां कृशोदरी, सुमध्या इत्यादिभिः विशेषणैः अपि कविना विशेषितं क्रियते।[10] यस्याः कटिदेशः सुन्दरं भवति सा सुमध्या इति परिचीयते। काव्ये हारलतां 'सुदती'[11] इति अपि कथ्यते, अस्य अर्थः भवति हारलता सुन्दरदन्तानाम् अधिकारिणी आसीत्।

(4) **मञ्जरी** — दामोदरगुप्तविरचितस्य कुट्टनीमतस्य अन्यतमा नायिका अस्ति मञ्जरी। नायिकामञ्जर्याः विविधानि चारित्रिकवैशिष्टानि काव्ये समुपलभ्यते। समरभटस्य प्रेमिका तथा गणिका मञ्जरी एका दक्षाभिनेत्री आसीत्। नाटकेऽस्मिन् सिंहलराजकन्यारत्नावलीचरित्रे अभिनयं कृतवती एषा मञ्जरी। सौन्दर्यस्य उत्कर्षता, उद्यमता तथा नृत्याचार्यस्य प्रचेष्टया मञ्दरी रत्नावली चरित्रे अभिनयं कृत्वा ख्यातिम् अर्जयति स्म।[12] मञ्जरी अङ्गचालनायां लालित्यप्रदर्शने, शोकेन तथा भयात् ध्वनेः विकारे, वाक्येन तथा क्रियाद्वारा श्रृङ्गारादि रसस्य भावप्रकाशे, नाटकीयचरित्रे एकात्मीभावनस्य सन्दर्भे, नाटकीय वेशभूषाधारणे च निपुणा आसीत्।[13]

सा आसीत् अपरूपा सुन्दरी। दैहिकलावण्यकारणेन सर्वे कामीपुरुषाः मञ्जरीं प्रति आसक्ताः आसन्। काव्ये मञ्जर्याः दैहिकलावण्यस्य सूक्ष्मातिसूक्ष्मवर्णना उपलभ्यते। ललित-भ्रूभङ्गी, स्मितहास्यम्, मनोरमं कटाक्षम्, मृदुवक्रोक्तिश्च आसन् तस्याः दैहिकलावण्यस्य परिपूरकम्।[14] एतेषां प्रदर्शनेन सा सर्वेषां पुरुषाणां मनसि कामभावस्य उद्रेकं करोति स्म। तस्याः गमनक्रिया प्रत्येकपुरुषाणां हृदये कुसुमशरस्य आघातम् अकरोत्। मञ्जरी आसीत् मृगशावकवत् चञ्चलनयना।[15] पुष्पसंयुक्तं तस्याः केशकलापं प्रत्येकपुरुषाणां मनसि कामस्य उद्भावनं करोति स्म।[16] तस्याः मुखमण्डलं पद्ममिव आसीत्।[17] पद्मवत् मञ्जर्याः मुखमण्डलमिदं दोषविहिनम् आसीत्।[18]

(5) **विलासा** — कुट्टनीमताकाव्ये विलासा अस्ति एका गणिका। गणिकावृत्तिमाध्यमेन हि सा जीवनयापनं कृतवती। एतेन तस्याः धनोपार्जनम् अभवत्। काव्ये मदनकेन सह वार्तालापकाले तस्य सखा सर्वाग्रे अस्याः विलासायाः नामोल्लेखं कृतवान्। सः गणिकां विलासां सम्भोगात् अनन्तरम् उपहाररूपेण चीनांशुकं ददाति स्म।[19]

(6) **केली** — काव्ये केली अस्ति एका गणिका। केली एका गौणचरित्रम् अस्ति। सा देहव्यवसाद्वारा अर्थं उपार्जनं करोति स्म। काव्ये कलहंसकेन सह तस्य मित्रस्य कथोपकथनकाले केली इत्यस्याः गणिकायाः नामोल्लेखः प्राप्यते। केली नम्रस्वभावविशिष्टा आसीत्।[20]

(7) **हरिसेना** — कुट्टनीमते उल्लिखिता अन्यतमा गणिका अस्ति हरिसेना। एतद् गौणचरित्रम् अस्ति। काव्ये हरिसेनया सह धनीविलासकस्य सम्पर्कम् आसीत्। न केवलं विलासकेन सह अपितु व्यापृतनामधारी उच्चराजकर्मचारीपुत्रेण सह अपि तस्याः सम्पर्कम् आसीत्। हरिसेना मूर्खः आसीत् इति काव्ये उल्लेखः प्राप्यते।[21]

(8) **मदनसेना** — कुट्टनीमते उल्लिखिता मदनसेना अस्ति एका सुन्दरी गणिका। सा सर्वासां पुरुषाणां प्रथमविकल्पः आसीत्। अतः मदनसेनां सम्भोगकरणार्थं कामीपुरुषाणाम् अधिकधनस्य प्रयोजनम् आसीत्। मदनसेनाहस्तात् मदिरापानस्य विलासं सर्वेषां क्षेत्रे सम्भवः नासीत्, तस्य कृते कठिनतपस्यायाः प्रयोजनं वर्तते। विषयेऽस्मिन् काव्ये उल्लिखितः श्लोकः अस्ति—

विभ्रम कियतस्तपसः फलमेतद् यदुपभुज्यते मदिरा।[22]

(9) **कुवलयमाला** — कुवलयमाला एका गणिका अस्ति। लीलोदय इति नाम्नः धनीपुरुषः तां प्रति आसक्तः आसीत्। सा लीलोदयस्य धनसम्पत्तिम् अपहृत्य तं परित्यक्तवती।[23]

(10) **तिलकमञ्जरी** — तिलकमञ्जरी एका गणिका अस्ति। मञ्जीरकेण सह तस्य मित्रस्य कथोपकथनकाले तिलकमञ्जर्याः उल्लेखः प्राप्यते। गणिकां तिलकमञ्जरीं प्रति आसक्तं भूत्वा इन्दीवरः निःस्वम् अभवत्।[24]

(11) **माधवी** — काव्ये उल्लिखिता माधवी एका गणिका वर्तते। विग्रहराजपुत्रेण सह तस्याः सम्पर्कम् आसीत्।[25]

(12) **इन्दुलेखा** — काव्ये उल्लिखिता इन्दुलेखा एका गणिका अस्ति। वेश्यावृत्तिद्वारा सा अर्थोपार्जनं करोति स्म। सा पानक्रीडासक्ता आसीत्।[26]

(13) **कामसेना** — काव्ये उल्लिखिता गणिका कामसेना एका गौणपात्री अस्ति। सा पशुप्रेमी आसीत्। विषयस्य अस्य प्रमाणम् उपलभ्यते 'नकुलः पयो न पायित' इति आलोच्य श्लोकांशेन।[27]

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

(14) **ललिता** — कुट्टनीमते उल्लिखिता ललिता एका गणिका अस्ति। सा कन्दुकक्रीडाप्रेमी आसीत्। एतदतिरिक्तं तस्याः विषये काव्ये किमपि न उपलभ्यते।[28]

(15) **कुसुमदेवी** — काव्ये उल्लिखिता कुसुमदेवी एका गणिका अस्ति। सा गणिकावृत्तिद्वारा प्रभूतस्वर्णालङ्कारम् अप्राप्नोत्।[29]

(16) **चन्द्रलेखा** — काव्ये उल्लिखिता चन्द्रलेखा एका गणिका अस्ति। गणिकावृत्तिद्वारा सा जीविकानिर्वाहं करोति स्म।[30]

(17) **सुरतसेना** — सा एका गणिका अस्ति। वासुदेवभट्टस्य पुत्रः इमां गणिकासुरतसेनां सम्भोगं करोति स्म।[31]

(18) **केतकिः** — काव्ये उल्लिखिता अन्यतमा गणिका अस्ति केतकिः। तस्याः अधरे विन्दु, कण्ठे मणिमाला, स्तनयुगले च शशप्लुतकं दृष्ट्वा मन्यते यत् केतकिः कामशास्त्रनिपुणपुरुषेण सह रतिक्रियां कृतवती। अतः सा सौभाग्यगर्विता आसीत् इति उच्यते।[32]

(19) **विलासिनी** — विलासिनी एका गणिका अस्ति। तया सह भास्करवर्मा इति नाम्नः धनीवणिकस्य सम्पर्कम् अभवत्। भास्करवर्मणः मृत्योरनन्तरं विरहकातराविलासिनी अग्नौ प्रविश्य निजजीवनं तत्याज। एतेन विलासिनीचरित्रे आदर्शप्रेमिकसत्त्वायाः परिचयः प्राप्यते।[33]

(20) **कदम्बका** — काव्ये उल्लिखिता रूपगुणैश्वर्यपरिपूर्णा कदम्बका एका गणिका अस्ति। अत्र तस्याः लोभहीनता इति चारित्रिकवैशिष्ट्यस्य परिचयः प्राप्यते। कदम्बका सर्वप्रकारम् ऐश्वर्यसुखं परित्याज्य दरिद्रं भट्टविष्णुं ग्रहणम् अकरोत्।[34]

(21) **रणदेवी** — कुट्टनीमते उल्लिखितेषु गणिकासु अन्यतमा प्रसिद्धा गणिका अस्ति इयं रणदेवी। सा आदर्शप्रेमिका अस्ति। अस्य प्रमाणम् उपलभ्यते प्रेमिकभट्टकदम्बकस्य पुत्रस्य मृत्योरनन्तरं विरहकातरारणदेव्याः देहत्यागमाध्यमेन। विषयेऽस्मिन् उल्लिखितः श्लोकः अस्ति—

भट्टकदम्बकतनये याते वसतिं परेतनाथस्य।
चक्रे देहत्यागं रणदेवी वारयोषितां मुख्या।।[35]

(22) **चित्रलता** — दामोदरगुप्तविरचितस्य कुट्टनीमतस्य अन्यतमं लघुचरित्रम् अस्ति इयं चित्रलता। सा एका गणिका अस्ति। काव्ये मालत्याः देहसौन्दर्येण सह चित्रलतायाः सैन्दर्यस्य तुलना कृता काव्यकारेण। नीचजनैः तस्याः नितम्बम् उपभुक्तम् अभवत् इति काव्ये उल्लेखः प्राप्यते। इयं चित्रलता दरिद्रा आसीत्।[36]

(23) **तरलिका** — काव्यस्य मञ्जर्याख्याने उल्लिखिता अन्यतमा गणिका वर्तते इयं तरलिका। काव्येऽस्मिन् तरलिकायाः धूर्ततायाः परिचयः प्राप्यते। तरलिका धनीवणिकहरस्य धनं अपहृतवती।[37]

(24) **प्रमदावती** — कुट्टनीमते उल्लिखिता अन्यतमा दूती आसीत् इयं प्रमदावती। काव्ये नायिकायाः दूत्याः भूमिका महत्वपूर्णा वर्तते। नायिका-नायकयोर्मध्ये मिलनसम्पादने तस्याः भूमिका अन्यतमं गुरुत्वपूर्णम्। वस्तुतः एतेन काव्यस्य फलप्राप्तिः जायते। दूती प्रमदावती परस्त्रीः प्रति समव्यथी आसीत्। सा परस्त्रीः प्रति उक्तवती यत् अपरूपदेहसौष्ठवम् उद्भिन्नयौवनं च नीत्वा कुपतेः पीडायां आक्रान्तं भूत्वा जीवनयापनं न उचितम्। एतेन परस्त्रीः प्रति प्रमदावत्याः समव्यथीसत्त्वायाः परिचयः प्राप्यते।[38]

उपसंहारः — कुट्टनीमतस्य स्त्रीपात्रविवेचनात् ज्ञायते यत् दामोदरगुप्तः पात्रनिर्माणे सूक्ष्मदृष्टिं प्रदर्शितवान्। मालती, विकराला तथा हारलता—एताः तिस्रः स्त्रियः स्वभाववैशिष्ट्येन परस्परं भिन्नाः सन्ति। मालत्याः व्यक्तित्वे रूपलावण्येन सह विद्याप्रेम, कलानैपुण्यं, मधुरवाणी तथा प्रेमशीलता समन्विता दृश्यते। विकराला तु अनुभवसम्पन्नया बुद्ध्या तथा व्यवहारज्ञानसंपदा अन्येभ्यः मार्गदर्शनं करोति। हारलता पुनः प्रेमनिष्ठया, आतिथ्यभावेन तथा आत्मीयतया विशिष्टा भवति। अतः एतेषां चरित्राणां माध्यमेन केवलं गणिकाजीवनस्य चित्रं न दृश्यते, अपितु तत्कालीनसामाजिकव्यवस्था, मानवीयसम्बन्धानां स्वरूपं, व्यवहारनीतिः तथा जीवनमूल्यानां विविधाः छायाः अपि उद्घाटिताः भवन्ति। काव्ये शृङ्गारस्य प्राधान्यम् अस्ति, तथापि पात्रचित्रणस्य माध्यमेन सामाजिकयथार्थस्य प्रभावी अभिव्यक्तिः कृताऽस्ति।

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

Endnotes

1. विक्रमाङ्कदेवचरितम्, सर्गसंख्या-1/11, पृष्ठासंख्या-18
2. H. Hudson, An Introduction to the study of Literature
3. साहित्यदर्पणम्, डॉ विमलाकान्त-मुखोपाध्यायः- 3/69 , पृष्ठा संख्या- 141
4. साहित्यदर्पणम्, डॉ विमलाकान्त-मुखोपाध्यायः 3/84 , पृष्ठा संख्या- 157
5. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 2
6. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या -8
7. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 8, श्लोकसंख्या- 43
8. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 9, श्लोकसंख्या- 9
9. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या -20
10. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 21
11. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 84
12. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 61, श्लोकसंख्या- 803
13. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 171
14. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 75, श्लोकसंख्या- 962
15. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या -75, श्लोकसंख्या- 963
16. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 75, श्लोकसंख्या- 964
17. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 75, श्लोकसंख्या- 965
18. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या -75, श्लोकसंख्या- 965
19. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 26
20. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 26
21. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 26
22. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 63, श्लोकसंख्या- 351
23. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 27
24. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 27
25. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 27, श्लोकसंख्या- 358
26. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 65, श्लोकसंख्या- 359
27. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 65, श्लोकसंख्या- 360
28. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 65, श्लोकसंख्या- 362
29. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 28
30. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 28, श्लोकसंख्या- 364
31. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 28
32. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 75, श्लोकसंख्या- 403
33. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 106
34. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 106, श्लोकसंख्या- 563
35. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 106, श्लोकसंख्या- 565
36. कुट्टनीमतम्, अध्यापक त्रिदिव नाथ राय, पृष्ठा संख्या - 143
37. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 56
38. कुट्टनीमतम्, चैताली दत्त, पृष्ठा संख्या 62

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 3 (SEP - OCT) 2026

Bibliography

- *Kuṭṭanīmatam* (Dāmodaraguptaḥ). Rāya, Adhyāpaka Tridivanātha. Kalikātā : Vasumatī-Sāhitya-Mandira, 1360 Vaṅgābda.
- *Kuṭṭanīmatam* (Dāmodaraguptaḥ). Datta, Caitālī. Kalikātā : Navapatra Prakāśana, 1998.
- *Vikramāṅkadevacaritam* (Vilhaṇa). Śāstrī, Śrī. Haragovinda. Vārāṇasī : Chaukhambā Surabhāratī Prakāśana, 1984.
- *Sāhityadarpaṇaḥ* (Viśvanāthaḥ). Mukhopādhyāya, Ḍô. Vimalākānta. Kolakātā : Pustaka-Śrī Prakāśana, 1367 Vaṅgābda.
- Bhattacharji, Sukumari. *"Prostitution in Ancient India"*, Social Scientist, Vol. XV, 1987.
- Hudson, William Henry. *"An Introduction to the study of Literature"* George G. Harap & Company, London, 1913
- Wojtilla, Gyula. *"Materials for a Critical Edition of the Kuṭṭanīmata"*, Vienna Journal of South Asian Studies, Vol. 46, 2002.

———